# महाभारत

हस्तिनापुरे धृतराष्ट्रः पाण्डुः इति द्वौ भ्रातरौ अवर्तेताम्। धृतराष्ट्रः अन्धः, पाण्डुः पाण्डुरोगी। ज्येष्ठः धृतराष्ट्रः कनिष्ठाय पाण्डवे अर्धराज्यं अयच्छत्। धृतराष्ट्रस्य दुर्योधनादयः शतं पुत्राः अभवत्। पाण्डोः धर्मराजः, भीमसेनाः, अर्जुनः, नकुलः, सहदेवः इति पञ्च तनयाः आसन्। द्रौपदी पाण्डवानां धर्मपत्नी आसीत्।

दुर्योधनः द्यूतेन पाण्डवानां राज्यं अपाहरत्। राज्यभ्रष्टाः पाण्डवाः द्रौपद्या सह वनं अगच्छन्। ते वने बहूनि कष्टानि अन्वभवन्। द्वादशवर्षपर्यन्तं ते वने न्यवसन्। त्रयोदशे वर्षे अज्ञातवासं विराटनगरे अकुर्वन्।

चतुर्दशे वर्षे ‘पुनः राज्यं प्रत्यर्पय’ इति दुर्योधनं अपृच्छन्।

लोभी दुर्योधनः राज्यं दातुं नैच्छत्। ततः कौरवपाण्डवानां मध्ये कुरुक्षेत्रे महत् युद्धं अभूत्। भगवान् श्रीकृष्णः पाण्डवानां पक्षे आसीत्। सः अर्जुनस्य रथसारथिश्च अभवत्। भीष्मद्रोणादयः दुर्योधनपक्षीयाः सर्वे अर्जुनेन मारिताः। दुर्योधन-दुःशासनादयः भीमेन संहृताः।

ततः धर्मराजः पट्टाभि-षेकमङ्गलं अन्वभवत्।